# पशुपति अष्टकम

## Pashupati Ashtakam

---

पशुपतियष्टकम ।

पशुपतीन्दुपतिं धरणीपतिं भुजगलोकपतिं च सतीपतिम ।
प्रणतभक्तजनार्तिहरं परं भजत रे मनुजा गिरिजापतिम ॥१॥

न जनको जननी न च सोदरो न तनयो न च भूरिबलं कुलम ।
अवति कोऽपि न कालवशं गतं भजत रे मनुजा गिरिजापतिम ॥२॥

मुरजडिण्डिमवाद्यविलक्षणं मधुरपञ्चमनादविशारदम ।
प्रमथभूतगणैरपि सेवितं भजत रे मनुजा गिरिजापतिम ॥३॥

शरणदं सुखदं शरणान्वितं शिव शिवेति शिवेति नतं नृणाम ।
अभयदं करुणावरुणालयं भजत रे मनुजा गिरिजापतिम ॥४॥

नरशिरोरचितं मणिकुण्डलं भुजगहारमुदं वृषभध्वजम ।
चितिरजोधवलीकृतविग्रहं भजत रे मनुजा गिरिजापतिम ॥५॥

मखविनाशकरं शिशिशेखरं सततमध्वरभाजिफलप्रदम ।
प्रळयदग्धसुरासुरमानवं भजत रे मनुजा गिरिजापतिम ॥६॥

मदमपास्य चिरं हृदि संस्थितं मरणजन्मजरामयपीडितम ।
जगदुदीक्ष्य समीपभयाकुलं भजत रे मनुजा गिरिजापतिम ॥७॥

हरिविरञ्चिसुराधिपपूजितं यमजनेशधनेशनमस्कृतम ।
त्रिनयनं भुवनत्रितयाधिपं भजत रे मनुजा गिरिजापतिम ॥८॥

पशुपतेरिदमष्टकमद्भुतं विरचितं पृथिवीपतिसूरिणा ।
पठति संश्रृणुते मनुजः सदा शिवपुरीं वसते लभते मुदम ॥९॥

इति श्रीपशुपत्यष्टकम संपूर्णम ॥